


## अथ सूर्य कवचं>

**ओं अस्य सूर्य कवच महामंत्रस्य अगस्त्यो भगवानृषिः। अनुष्टुप्छंदः। सूर्यो देवता। श्रीं बीजं। णीं शक्तिः। सूं कीलकं। मम सूर्यप्रसादसिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) सूर्याय अंगुष्ठाभ्यां नमः। तेजोमूर्तये तर्जनीभ्यां नमः। वरदाय मध्यमाभ्यां नमः। हंसाय अनामिकाभ्यां नमः। शांताय कनिष्टिकाभ्यां नमः। कर्मसाक्षिणे करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) सूर्याय हृदयाय नमः। तेजोमूर्तये शिरसे स्वाहा। वरदाय शिखायै वषट्। हंसाय कवचाय हुं। शांताय नेत्रत्रयाय वौषट्। कर्मसाक्षिणे अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) जपाकुसुमसंकाशं द्विभुजं पद्महस्तकं। सिंधूरांबरमाल्यं च रक्तगंधानुलेपनं। माणिक्यरत्नखचित सर्वाभरणभूशितं। सप्ताश्वरथमाहं च मेरू यांतं प्रदक्षिणं। देवासुरवरैर्वंद्यं रश्मिभिः परिवेष्टितं। सूर्यं ध्यात्वा सुवणाभं पठेश्च कवचं मुदा॥ (अथ कवचं) घृणिः पातु शिरोदेशं सूर्यः पातु ललाटकं। आदित्यो लोचने पातु शृती पातु दिवाकरः। घ्राणं पातु सदा भानुः मुखं पातु सदा रविः। जिह्वां पातु जगन्नेत्रः कंठं पातु विभवसुः। स्कंधौ ग्रहपतिः पातु भुजौ पातु प्रभाकरः। करावब्जः करः पातु हृदयं पातु भानुमान्। मध्यं पातु सुसप्ताश्वो नाभिं पातु नभोमणिः। द्वादशात्मा कटिं पातु सविता पातु सक्थिनी। ऊरू पातु सुरश्रेष्ठो जानुनी पातु भास्करः। जंघे पातु मार्तांडो गुल्फौ पातु त्विषांपतिः। पादौ दिनमणिः पातु पातु मित्रोखिलं वपुः। आदित्य कवचं पुण्यमभेद्यं वज्रसन्निभं। सर्वरोगभयादिभ्यो मुच्यते नात्र संशयः। संवत्सरमुपासित्वा साम्राज्य पदवीं लभेत्॥ अनेक रत्न संयुक्तं स्वर्ण माणिक्यभूषणं। कल्पवृक्षसमाकीर्णं कदंबकुसुमप्रियं। अशेषरोग शांत्यर्थं ध्यायेतादित्य मंडलं। सिंधूरवर्णाय सुमंडलाय सुवर्ण रत्नाभरणाय तुभ्यं॥ पद्माभिनेत्राय सुपंकजाय ब्रह्मेंद्र नारायण शंकराय। संरक्तचूर्णं ससुवर्णतोयं सकुंकुमाभ्यं सकुशं सपुष्पं प्रदत्तमादाय च। हेमपात्रे सहस्रभानोभगवान्प्रसीद। इति श्री पद्ममहापुराणे सूर्यकवचं ॥**

---

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com